

# Sri Tulasi Namashtaka Stotram – Brahma Vaivarta Puranam

# ॥ श्रीतुलसी नामाष्टक स्तोत्रं - ब्रह्म वैवर्त पुराणम् ॥

The following is a rare **Tulasi Namashtaka Stotram** from **Brahma Vaivarta Puranam** and this stotra appears in **Prakriti Khanda**, **Chapter 22** as part of **Tulasi Puja Vidhi** within **Tulasi Upakhyana**.

This Stotra gives eight important names of Tulasi Devi – **Vrinda**, **Vrindavani**, **Vishva Pavani**, **Vishva Pujita**, **Pushpasara**, **Nandini**, **Tulasi** and **Krishna Jivani** and each stanza extols each of these eight names. This hymn is created by Lord Narayna himself and therefore the sacredness of this stotra need not be emphasized. Nevertheless, a gist of the Phalashruti is given below.

- One who chants this hymn after performing Tulasi Puja begets the benefit of performing Ashwamedha Yaga.
- Lord Narayana prayed Tulasi Devi on the full moon day of Kartika month, the day Tulasi was born and therefore one who prays Tualsi Devi on this day attains Vishnu Loka after getting absolved of all his sins.
- One who offers Tulasi leaves to Lord Narayana during the Kartika month gets the benefit of donating one thousand cows.
- Just by chanting this hymn one gets progeny, life partner, relatives, etc and gets relief from all diseases, fears and sins.

श्रीभगवानुवाच -

वृन्दा रूपाश् च वृक्षाश् च यदैकत्र भवन्ति च ।
विदुर् बुधास्तेन वृन्दा मत्प्रियां तां भजाम्यहम् ॥ १ ॥

पुरा बभूव या देवी ह्यादौ वृन्दावने वने ।
तेन वृन्दावनी ख्याता सुभगां तां भजाम्यहम् ॥ २ ॥

असङ्ख्येषु च विश्वेषु पूजिता या निरन्तरम् ।
तेन विश्व पूजिताख्यां जगत्पूज्यां भजाम्यहम् ॥ ३ ॥

असङ्ख्यानि च विश्वानि पवित्राणि यया विना ।
तां विश्वपावनीं देवीं विहरेण स्मराम्यहम् ॥ ४ ॥

देवा न तुष्टाः पुष्पाणां समूहेन यया विना ।
तां पुष्पसारां शुद्धां च द्रष्टुं इच्छामि शोकतः ॥ ५ ॥

विश्वे यत् प्राप्ति मात्रेण भक्त्यानन्दो भवेद् ध्रुवम् ।
नन्दिनी तेन विख्याता सा प्रीता भविता हि मे ॥ ६ ॥

यस्या देव्यास्तुला नास्ति विश्वेषु निखिलेषु च ।
तुलसी तेन विख्याता तां यामि शरणं प्रियाम् ॥ ७ ॥

कृष्ण जीवन रूपा या शश्वत् प्रियतमा सती ।
तेन कृष्ण जीवनीति मम रक्षतु जीवनम् ॥ ८ ॥

## ॥ फलश्रुतिः ॥

वृन्दां वृन्दावनीं विश्व पावनीं विश्वपूजिताम् ।
पुष्पसारां नन्दिनीं च तुलसीं कृष्ण जीवनीम् ॥ ९ ॥

एतन् नामाष्टकं चैतत् स्तोत्रं नामार्थ संयुतम् ।
यः पठेत् तां च संपूज्य सो ऽश्वमेध फलं लभेत् ॥ १० ॥

कार्तिकी पूर्णिमायां च तुलस्या जन्म मङ्गलम् ।
तत्र तस्याश् च पूजा च विहिता हरिणा पुरा ॥ ११ ॥

तस्यां यः पूजयेत् तां च भक्त्या च विश्वपावनीम् ।
सर्वापद् विनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १२ ॥

कार्तिके तुलसी पत्रं विष्णवे यो ददाति च ।
गवामयुत दानस्य फलं आप्नोति निश्चितम् ॥ १३ ॥

अपुत्रो लभते पुत्रं प्रियाहीनो लभेत् प्रियाम् ।
बन्धुहीनो लभेद् बन्धुं स्तोत्र स्मरण मात्रतः ॥ १४ ॥

रोगी प्रमुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
भयान् मुच्येत भीतस् तु पापान् मुच्येत पातकी ॥ १५ ॥

---

**.. इति श्री ब्राह्मे वैवर्ते पुराणे प्रकृति खण्डे तुलस्युपाखायाने**
**श्रीतुलसी नामाष्टक स्तोत्रं सम्पूर्णम् ..**